# संस्कृत वार्ता:

दिनाङ्क :- 04/05/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- पश्चिमबङ्गस्य विधानसभानिर्वाचने भाजपेति दलम् प्रबल जनादेशं प्राप्तुं सज्जमस्ति; अष्टचत्वारिंशत् स्थानानि जित्वा प्राय:सार्धैकशताधिकेषु च अग्रे अस्ति, तृणमूल्-पक्षः 13 स्थानानि जित्वा 73 स्थानेषु अग्रे अस्ति।
- असम-राज्ये भाजपेतिदलम् तृतीयावधिं यावत् पुनः अधिकारं प्राप्स्यनीति इति निश्चितम्।
- तमिळुनाडुराज्ये, अभिनेतृतः राजनेतारूपेण परिवर्तितः विजयस्य टी. वी. के. इति दलम् बृहत्तमदलत्वेन उद्भूत्वा इतिहासं रचयति।
- केरल-राज्ये काङ्ग्रेस्-पक्षस्य नेतृत्वे यू. डी. एफ्.-दलसमूह: एल्. डी. एफ्. इत्यस्य स्थाने स्पष्टं बहुमतं प्राप्तुं प्रस्थितः, एन्. डी. ए. दलसमूहश्च पुद्दुचेरी-नगरे अधिकारं धारयितुं प्रस्थितोऽस्ति।

----------------------------------------

<u>विधानसभानिर्वाचनानि</u>

चतुर्णां राज्यानां साम्प्रतीकगणनानुसारं, पश्चिमबङ्गप्रदेशे भाजपेतिदलम् आश्चर्यजनकतया आधिक्यं प्राप्नोत्, तमिळुनाडुराज्ये नूतनतया प्रविष्टस्य अभिनेतुः सी. जोसेफ विजयस्य तमिलगा वेट्ट्री कझगम् इति दलम् अग्रे अस्ति, विपक्षीभूतम् ए. आई. ए. डी. एम्. के. इति दलम् द्वितीयस्थाने अस्ति, राज्यस्य साम्प्रतिकशासकदलम् डी. एम. के. दलञ्च तृतीयस्थाने अस्ति। केरले सर्वेषां चत्वारिंशदधिकैकशतविधानसभाक्षेत्राणां परिणामानि, प्रवृत्तयश्च उपलभ्यन्ते। यत्र काङ्ग्रेस्-दलस्य नेतृत्वे युनैटेड्-डेमोक्रैटिक्-फ्रण्टेतिदलसमूहः सत्ताधारी-वाम-डेमोक्राटिक्-फ्रण्ट्-दलसमूहस्य पराजयात्मिकाः प्रवृत्तयः सन्ति आगम्यमानाः। काङ्ग्रेस्-दलम्

55 स्थानानि जित्वा 8 स्थानेषु च अग्रे अस्ति, काङ्ग्रेस्-दलस्य मित्रपक्षभूतम् आई. यू. एम्. एल्. दलम् 15 स्थानानि जित्वा 7 स्थानेषु च अग्रे अस्ति, सत्ताधारी सी. पी. एम्. दलम् 22 स्थानानि जित्वा 4 स्थानेषु अग्रे अस्ति, सहयोगीदलम् सी. पी. आई. दलम् 07 स्थानानि जित्वा 01 स्थाने अग्रे अस्ति, केरल-काङ्ग्रेस् दलम् 06 स्थानानि जित्वा 01 स्थाने च अग्रे अस्ति।

पश्चिमबङ्गालराज्यस्य त्रिनवत्यधिक द्विशत विधानसभासनेषु आहत्य एकषष्ठी निर्वाचनक्षेत्राणां परिणामाः घोषिताः। भाजपेति दलं अष्टचत्वारिंशत् आसनानि प्राप्नोत्, तृणमूल्-काङ्ग्रेस-दलं च त्रयोदश आसनानि प्राप्नोत्।

ये प्रमुखाः भाजपा- प्रत्याशिनः विजयं पञ्जीकृतवन्तः, तेषु आसनसोल्-दक्षिणक्षेत्रात् अग्निमित्रा पॉलः, भातर-क्षेत्रात् करफा सौमेनः चास्ति। टी. एम्. सी. इति दलस्य रेयार हुसैनः सरकारः भगवाङ्गोला-क्षेत्रात् विजयी अभवत्। अधुना पर्यन्तं उपलभ्यमानानां द्वात्रिंशदधिक द्विशतासनानां प्रवृत्तेः अनुससारं भाजपेति-दलं त्रि पञ्चाशदधिकैकशतासनेषु, तृणमूल्-काङ्ग्रेस्-दलं त्रिसप्तति स्थानेषु, सि. पि. एम्. दलं एकं काङ्ग्रेसः द्वे, अन्ये च त्रिषु आसानेषु अग्रे सन्ति।

मुख्यमन्त्री तथा टि. एम्. सी. नेत्री ममता बनर्जी भवानीपुर-क्षेत्रे स्वस्याः भाजपा-प्रतिद्वन्द्विनः सुबेन्दु अधिकारी इत्येतस्य अपेक्षया अग्रे अस्ति, तथा च सुबेन्दु अधिकारी नन्दीग्राम-क्षेत्रे अग्रे अस्ति। आम्-जनता-उन्नयन्-दलस्य (ए. जे. यू. पी.) प्रमुखः हुमायू कबीरः नौदा तथा रेजिनगर् स्थानयोः अग्रे अस्ति।

अपरत्र अभिनेतारूपेण परिवर्तितः राजनेता विजयः तमिलगा वेत्री कझगम् (टि. वि. के.) इति दलमाध्यमेन तमिळुनाडुराज्यस्य विधानसभानिर्वाचने इतिहासं रचयितुं सज्जः अस्ति। राज्यस्य बृहत्तमदलत्वेन च तस्यदलम्।

तस्यदलञ्च उद्भूतमस्ति, राज्यस्य चतुस्त्रिंशदधिकद्विशत निर्वाचनक्षेत्रेषु 107 स्थानेषु अग्रे अस्ति। सम्पूर्णे राज्ये कठोरसुरक्षायाः मध्ये सर्वेषु मतदानकेन्द्रेषु, निर्दिष्ट-गणनाकेन्द्रेषु मतगणना प्रचलति। राज्ये तीव्रत्रिकोणीयसंघर्षे निर्वाचन-आयोगानुसारं, मुख्यमन्त्री एम्. के. स्व्यालिन् इत्यस्य नेतृत्वे शासितः द्रविड-मुन्नेत्र-कझगम् (डी. एम्. के.) इति दलं 49 आसनेषु

अग्रे अस्ति, नवस्थानानि च प्राप्नोत्, तस्य प्रतिद्वन्द्वी अखिलभारतीय-अण्णा-द्रविड-मुनेत्र-कझगम् (ए. ऐ. ए. डी. एम्. के.) पक्षः 52 आसनेषु अग्रे अस्ति। पि. एम्. के. पक्षः पञ्चस्थानेषु अग्रे अस्ति, भारतीय-राष्ट्रिय-काङ्ग्रेस् (ऐ. एन्. सि.) पक्षः चतुर्षु स्थानेषु अग्रे अस्ति, भाजपेति दलं द्वयोः स्थानयोः अग्रे अस्ति, अन्ये च 8 स्थानेषु अग्रे सन्ति। असम-राज्ये, सत्ताधारी-भाजपा-पक्षः अस्साम्-राज्ये निरन्तरं तृतीयवारं अधिकारं धारयितुं सज्जः प्रतीयते। आहत्य षड्विंशत्यधिकैकशत- विधानसभा-स्थानेषु 39 निर्वाचनक्षेत्राणां कृते परिणामस्य घोषणा कृता अस्ति। भाजपा-पक्षः 31 स्थानानि प्राप्नोत्, तस्य मित्रपक्षैः ए. जी. पी. पक्षेन 02 स्थाने प्राप्ते, बोडोलेण्ड्-पीपल्स्-फ़्रण्ट् पक्षेन 5 स्थानानि प्राप्तानि, अपरत्र अखिलभारतीय-संयुक्त-लोकतान्त्रिक-फ़्रण्ट् पक्षेन (ए. ऐ. यू. डी. एफ़्.) एकं स्थानम् प्राप्तम्। शेषानां 87 आसनानां कृते उपलभ्यमानानां प्रवृत्तेः अनुगुणं भाजपेति पक्षः 50 आसनेषु अग्रे अस्ति। तस्य मित्रपक्षः-ए. जी. पी.-पक्षः 6, बोडोलेण्ड्-पीपल्स्-फ़्रण्ट्-पक्षः 5, काङ्ग्रेस्-पक्षः 21, ए. ऐ. यू. डी. एफ़्.-पक्षः 1, राईज्योर-दल-पक्षः 2 स्थानेषु च अग्रे अस्ति। 126 सदस्येषु अस्साम्-विधानसभायां बहुमतस्य अङ्कः 64 अस्ति।

केरले सर्वेभ्यः 140 आसनानां कृते प्रवृत्तयः परिणामाः च उपलभ्यमानाः सन्ति। काङ्ग्रेस्-पक्षः 05 स्थानानि जित्वा 57 निर्वाचनक्षेत्रेषु अग्रे अस्ति, राज्यस्य शासकः सी. पी. एम्. पक्षः 04 स्थानानि जित्वा 23 स्थानेषु अग्रे अस्ति, तस्य मित्रपक्षः सि. पि. ऐ. पक्षः 09 स्थानेषु अग्रे अस्ति, आर्. एस्. पि. पक्षः 03 स्थानेषु अग्रे अस्ति। केरल-काङ्ग्रेस्-पक्षः 07 स्थानेषु, भाजपा-पक्षः 2 स्थानेषु च अग्रे अस्ति। पुदुचेरीति -केन्द्रशासितप्रदेशस्य अपि परिणामाः प्राप्ताः; घोषितासु 13 परिणामेषु, सत्ताधारी-ए. ऐ. एन्. आर्. सी.-दलम् 06 स्थानानि जित्वा 04 स्थानेषु अग्रे अस्ति। काङ्ग्रेस्-पक्षः 1 स्थानं जित्वा 6 स्थानेषु अग्रे अस्ति। डी. एम्. के. पक्षः 1 स्थानं जित्वा 03 स्थानेषु अग्रे अस्ति, बी. जे. पी. पक्षः 2 स्थानयोः अग्रे अस्ति, ए. ऐ. ए. डी. एम्. के. पक्षः 1 स्थाने अग्रे अस्ति, स्वतन्त्रः पक्षः 2 स्थानयोः अग्रे अस्ति तथा च 1 स्थाने अग्रे अस्ति। पञ्चराज्येषु सप्त-निर्वाचनक्षेत्राणां उप-विधानसभा-निर्वाचने भाजपेति दलं गुजरात-

त्रिपुरा-नागालैण्ड्-राज्येषु प्रत्येकस्मिन् स्थाने विजयं प्राप्नोत्, महाराष्ट्र-कर्नाटक-राज्ययोः एकस्मिन् स्थाने च अग्रे अस्ति। कर्णाटके काङ्ग्रेस्-पक्षः द्वि निर्वाचनक्षेत्रे अवाप्नोत्, महाराष्ट्रे भाजपायाः मित्रपक्षः राष्ट्रवादी काङ्ग्रेस्-पक्षः (एन्. सि. पि.) अन्यस्मिन् निर्वाचनक्षेत्रे अग्रे अस्ति।

---------------------------------------

<u>प्रधानमन्त्री भाजपा-मुख्यालये</u>

अद्य सायङ्काले प्रधानमन्त्री नरेन्द्रमोदी नवदिल्ल्याः भाजपा-मुख्यालयं गच्छति, चतुर्षु राज्येषु, एकस्मिन् केन्द्रशासितप्रदेशे च विधानसभानिर्वाचनस्य परिणामानन्तरं सः दलस्य कार्यकर्तॄन् सम्बोधयति।

---------------------------------------

<u>इरान्-देशेन संयुक्तराज्यामेरिका</u>

इरान्-देश: संयुक्तराज्यामेरिका-देशाय होर्मुज़्-जलसंध्यां न प्रविष्टुं सावधानम् अकरोत्। तेनोक्तं यत् अस्मिन् क्षेत्रे प्रवेशस्य कस्मिन्नपि प्रयासे बलप्रयोगः भविष्यति। एकस्मिन् वक्तव्ये, इरान्-देशस्य खतम-अल-अन्बिया-केन्द्रीय-मुख्यालयः अवदत् यत् कापि विदेशीय-सशस्त्र-सेना, मुख्यतया यू. एस. सैनिकाः, यदि महत्त्वपूर्णे नौकायानमार्गे प्रविशन्ति तर्हि लक्षिताः भविष्यन्ति। इरान-देशस्य सेनया पुनः उक्तं यत् जलसंध्याः सुरक्षा इरान्-देशस्य नियन्त्रणे एव अस्ति, तथा च नौका-यानानां सुरक्षितमार्गाय तस्य सैन्येन सह समन्वयं करणीयम्। अद्यारभ्य जलमार्गे लम्बितानां नौका-यानानां साहाय्यार्थं कार्यम् आरप्स्यते इति अमेरिका-देशस्य घोषणायाः अनन्तरम् एषा पूर्वसूचना समागतास्ति।

।। इति वार्ता: ।।